# चन्द्रसम्भवमहाकाव्ये मौद्गल्यवंशवीजवैशिष्ट्यम्

गुरुप्रसादकोइराला *
विद्यावारिधिः

**सारः**

*नैपालकसंस्कृतकविसम्प्रदायस्यापरः सर्जको विद्यते यज्ञशर्मसुरिः । अनेन विक्रमवर्षस्याष्टादशशतके चन्द्रसम्भवमहाकाव्यं प्रणीतम् । अत्र चन्द्रवंशसम्भवानां राज्ञां वर्णनं विद्यते। अस्य लेखस्य विषयस्तु महर्षिमुद्गलात् प्रथितो मौद्गल्यवंशवैशिष्ट्यप्रकाशनमेव ।*

*प्रसिद्धपुरुवंशे सञ्जातो भर्म्यास्वः क्षत्रीय राजा आसीत् । अस्य मुद्गलः, यवीनरः, वृहदिश्वः, कापिञ्जलः, जयश्चेति पञ्च पुत्राः सञ्जाताः । मुद्गलो जन्मगुणकर्मभिश्च ज्येष्ठ आसीत् । मुद्गलः स्वभावेनैव सुशीलः, शान्तः, विनम्रश्चासीत् । अत एवासौ राज्यादिशासनसौख्यं भ्रातृजनेषु समर्प्य युवावस्थायामेव देवाराधनार्थं वनमगच्छत् । प्रियमेधादयः स्वपूर्वजाः क्षत्रीयराजानस्तपशक्त्या ब्राह्मणा जाता इति स्ववंशवृद्धैवचनैर्मुद्गलः तेषां मार्गे प्रेरितः । वने कठोरतपश्चर्यां संलग्नस्य मुद्गलस्य तपोबलेन स्वर्लोकोऽपि कम्पितो जातः । निजस्थानविनाशशङ्कया भयभीतैर्देवैः तपःकार्यादपकर्तुं अप्सरगणाः प्रेषिताः । गीतनृत्यादिगुणसम्पन्नाभिर्देवाङ्नाभिरङ्गप्रदर्शनपुरस्सरं गीतं नृत्यञ्चोपस्थाप्य शृङ्गारसारं प्रस्तुतम् । अनेकैरूपायैरपि स्वोद्देश्यपूर्तये पराजिता अप्सराः स्वर्लोके प्रत्यागमनमकुर्वन् । मुद्गलस्य तपस्तु क्रमशः परिणामफलप्राप्त्यर्थमुन्मुखोऽभवत् । तपस्यया वशीकृतो भगवान् नारायणः स्वयमुपस्थितवान् । भगवतो नारायणस्य दर्शनमवाप्य मुद्गलः सुकोमलैर्वचोभिः स्तुतिमकरोत् । तपसा स्तुत्या च प्रसन्नो हरि इप्सितवरलाभार्थं मुद्गलमपृच्छत् । मुद्गलोऽपि - सर्वज्ञोऽसि त्वम्, तथापि वच्मि यत् अहम् ब्रह्मत्वं प्राप्तुमिच्छामि इति कथितवान् । भगवता कथितम्- त्वं ब्राह्मणमेव नापितु सोत्तममुनित्वेन सुप्रसिद्धो भविष्यसि, तव वंशश्च मौद्गल्यब्रह्मवंशरूपेण लोके विवर्धयिष्यति । इप्सितवरमवाप्य मुद्गलः काञ्चीदेशमगच्छत् । तत्र सुदीर्घकालपर्यन्तं वैदिकसनातनधर्मप्रसारे संलग्नोऽभवत् । अनन्तरं मुद्गलः स्वकीयवंशविस्तारार्थमेकां ब्राह्मणकन्यामुवाह । गृहस्थ-जीवनस्यानन्दमनुभवनस्य दिवोदासनामक एकः पुत्रः, अहल्यानामिका एका पुत्री च सञ्जाता । पुत्र्या अहल्याया गौतमेन सह विवाहं कृतवान् । एतयोः पुत्रः शतानन्दोऽभूत् । पुत्रस्तु उपनयनसंस्कारं सम्पाद्यानेन कुलपूजनविधिना प्रशिक्षितः । अनन्तरं काचित् ब्राह्मणकन्यया सह पुत्रस्य विवाहकार्यमपि सम्पादितम् । अहं पितृऋणाद्मुक्तो जात इति विचार्य पुत्रं गृहस्थधर्मोत्तराधिकारित्वेनोपदिश्य मुद्गलः स्वं भगवच्चरणारविन्दे समर्पितः ।*

**शब्दकुञ्जी** - मुद्गलः, मौद्गल्य, क्षत्रियः, ब्रह्मणः, कुलम्, वंशः, चन्द्रवंशः, नारायणः यज्ञः, तपः ।

## १. विषयप्रवेशः

पौरस्त्यसमाजो वर्णाश्रमधर्मनिवद्धो विद्यते । श्रुत्या स्मृत्या च कर्मानुसारं लोकानां वर्णाश्रमधर्मो निर्धारितः । तद्यथा- पठनपाठनादिज्ञानादानप्रदानादिकार्ये संलग्ना ब्राह्मणाः,

---

* *सहप्राध्यापकः ने.सं.वि. पिण्डेश्वरविद्यापीठम् धरानः ।*

समाजदेशरक्षणपरिपालनादिकार्ये संलग्नाः क्षत्रीयाः, लोकानामावश्यकतापरिपूरणार्थमावश्यक-सामग्रयः परिपूरकाः वैश्याः, जनसेवाकार्ये संलग्नाः शुद्रा इति । एतेषु ज्ञानप्रदानकार्यमेवोत्कृष्टमिति मत्वा विश्वामित्रप्रभृतयो बहवः क्षत्रियास्तपःशक्तिप्रभावाद् ब्रह्मत्वमधिगताः । अस्मिन्नेव मार्गे प्रियमेधादयो मुद्गलपूर्वजा अपि सङ्गताः । क्षत्रियवंशोत्पन्नो मुद्गलोऽपि शान्तः, सौम्यः, विनम्रश्चासीत् । अत एव राज्यसञ्चालनादिकार्यादस्य मनः पराङ्मुखो जातः । पूर्वजानुरूपमहमपि ब्रह्मत्वं प्राप्तुं शक्नोमीत्यनेन दृढनिश्चयो विहितः । ज्येष्ठपुत्रस्याधिकारत्वेन प्राप्तमपि पैत्रिकं राज्यसञ्चालादिकं कार्यं भ्रातृषु समर्प्य निर्जने वने शारीरिकं काठिन्यमुपेक्ष्य भगवतो नारायणस्याराधनायां संलग्नो जातः । तस्मिन् समये स्वराज्यापहरणशङ्कया देवैस्तपकार्यादपनयनाय विविधानि निरोधककार्याणि कृतानि । दृढनिश्चयारूढो मुद्गलः कार्यान्तरेणोत्साहच्युतो नाभवत् । अन्ततस्तपप्रभाववशीभूतो नारायणः स्वयमुपागत्य उद्देश्यानुरूपं ब्रह्मत्वप्राप्तिरूपं वरमददत् । अनन्तरं महर्षिमुद्गलवंशोत्पन्ना जना ब्राह्मणवर्णाश्रमधर्मत्वेन प्रसिद्धाः । महर्षिमुद्गलेनैव स्वं पुत्रं दिवोदासं मौद्गल्यकुलपूजाविधिश्चोपदिष्टः । भारतवर्षस्य काञ्चीनगरे स्थिता मौद्गल्यवंशीया तत्र तुर्कदेशीयै यवनैराक्रान्ताः सन्तो हिमालयतले सुरम्यस्थले नेपालदेशे समागताः । अत्रास्य वंशजाः स्थानभेदत्वेन कोइराला, तिम्सिना, कुइँकेल इत्यादयो वंशोपनाम्ना विख्याताः । [२]

## २. पूर्वकार्यसमीक्षा

चन्द्रवंशमहाकाव्यमुद्दिश्य कतिपयैर्विद्वद्भिश्चर्चा विहिता । अद्यावधि विहितमध्ययनमत्र पूर्वकार्यत्वेनोल्लिख्यते ।

क. प्राध्यापको वेणीमाधवढकालश्चन्द्रवंशमहाकाव्यस्य संपादको विद्यते । अनेन सम्पादनक्रमे महता परिश्रमेणास्य महाकाव्यस्य हस्तलिखिते पुस्तके स्थिता अशुद्धांशाः परिस्कृता । इत्येव न महाकाव्यस्य प्रारम्भे **कवि यज्ञसूरिप्रणीत चन्द्रसम्भवमहाकाव्यको परिचय एवम् समीक्षा** इत्यालेखे नेपालीभाषायां महाकाव्यस्य साङ्गोपाङ्गं विवेचनमप्यनेन विहितम् । सम्पूर्णकाव्यं समीक्षितुं कृतप्रयत्नेनानेन मौद्गल्यवंशबीजविषये स्वल्पमेवोल्लिखितम् । (चन्दंवंशमहाकाव्यम् : भूमिका)

ख. प्राध्यापको नुरापतिपोखरेलः प्रभापत्रिकायां **नेपालमा संस्कृतमहाकाव्यको परम्परा** इति शीर्षकनिबद्धे लेखे संस्कृतमहाकाव्यस्य विकाशक्रमे समागतस्य चन्द्रवंशमहाकाव्यस्य ईषत् चर्चां विदधाति । (प्रभा : २०६६)

ग. प्राध्यापको माधवभट्टराई नैपालकविविरचितानां संस्कृतमहाकाव्यानां समालोचनात्मकमध्ययनमिति शीर्षकनिबद्धेऽप्रकाशितशोधप्रबन्धे चन्द्रवंशमहाकाव्यस्यापि पूर्णात्मकं विस्तृतमध्ययनं करोति । विषयबाहुल्यादनेनापि मौद्गल्यवंशबीजविषये सामान्या चर्चा एव विहिता ।

घ. समीक्षको महानन्दतिमिल्सिना प्रज्ञाज्योतिपत्रिकायां नैपालकसंस्कृतमहाकाव्यलेखनपरम्परा

---

२ वेणीमाधवढकालः, चन्द्रसम्भवमहाकाव्यम् (प्रस्तावना खण्ड), काठमाडौं : ने.रा.प्र. प्रतिष्ठान, वि. सं. २०५८, पृ. २३ ।

इति शीर्षकनिबद्धे लेखे नैपालककवीनां महाकाव्यलेखनपरम्परावर्णनक्रमे चन्द्रवंशमहाकाव्यस्यापि सामान्यं विवेचनं प्रस्तौति । (प्रज्ञाज्योतिः २०६९)

ङ. समीक्षको लक्ष्मीप्रसादकोइराला मुद्‌गलसन्देशपत्रिकायां चन्द्रसम्भव महाकाव्य : सङ्क्षिप्त परिचय इति शीर्षकसम्बद्धे लेखे महाकाव्यस्य पूर्णात्मकं विश्लेषणं करोति । तत्क्रमे मुद्‌गलवंशबीजस्यापि सामान्यां चर्चां प्रस्तौति । (मुद्‌गल सन्देश : २०७६)

चन्द्रवंशमहाकाव्यस्याध्ययनसन्दर्भे एतेषु पूर्वप्राप्तिषु कैश्चित् समीक्षकैः पूर्णरूपेण कैश्चित्तु मूलविषयप्रसङ्गसमागतत्वेन कृतं समान्यमध्ययनं दृश्यते । मौद्‌गल्यवंशबीजमेव प्राधान्येन विषयीकृत्य केनापि समीक्षकेण कृतमध्ययनमद्यावधि न प्राप्यते ।इमामेवाश्यकतां विनिभाल्य लेखेऽस्मिन् मौद्‌गल्यवंशबीजाध्ययनं क्रियते ।

## ३. समस्याकथनम्

नैपालकसंस्कृतकविना यज्ञशर्मसूरिणा चन्द्रवंशमहाकाव्यं प्रणीतम् । महाकाव्येऽस्मिन् ख्यातयशसा लोकमुज्ज्वलयतां चन्द्रवंशीयराज्ञां श्रवणीया कथा वर्णिता विद्यते । अस्य साङ्गोपाङ्गमध्ययनं तु नैकैः समालोचकैर्विहितम्, परं तपःशक्त्या क्षत्रीयवंशाद् मौद्‌गल्यमित्याख्ये ब्राह्मणवंशे प्रवर्तकं महर्षिमुद्‌गलमुद्दिश्य विस्तृतरूपेण केनापि नानुसन्धितम् । अतो मौद्‌गल्यवंशबीजं कीदृशमिति लेखस्य समस्या विद्यते । एवमेव क्षत्रियाद् ब्राह्मणत्वमधिगतानां मौद्‌गल्यवंशीयजनानां कृते किदृशी कुलपूजा निर्दिष्टा इत्यपि समस्या विद्यते ।

## ४. उद्देश्यम्

चन्द्रवंशमहाकाव्ये चन्द्रवंशोत्पन्नानां राज्ञां वर्णनक्रमे महर्षिमुद्‌गलस्य वृत्तान्तमपि वर्णितं विद्यते । महर्षिमुद्‌गलादेव मौद्‌गल्याख्यं ब्राह्मणवंशं प्रादुर्भूतम् । अत्रैव समस्या रूपेण समागता मौद्‌गल्यवंशबीजं कीदृशम्, कीदृशी च तेषां कुलपूजाविधि इत्यस्य समाधानार्थं मौद्‌गल्यवंशवीजप्रकाशनम्, मौद्‌गल्यब्राह्मणवंशीयानां जनानां कुलपूजाविधिप्रकाशनम् चास्य लेखस्योद्देश्यत्वेन निर्धारितं विद्यते ।

## ५. अध्ययनविधिः

अध्ययनेऽस्मिन् यज्ञशर्मसूरिविरचितं चन्द्रवंशमहाकाव्यमेव प्राथमिकसामग्रीत्वेनोपयोगो विहितः । द्वितीयकसामग्रीरूपेण महाकाव्यसम्बद्धा महर्षिमुद्‌गलसम्बद्धाश्च सामग्र्यः स्वीकृताः । अत्रैताः सामग्रीरधीत्य निष्कर्षप्राप्त्यर्थं व्याख्यात्मकविश्लेषणात्मकविवरणात्मकप्रभृतयोऽध्ययन-विधयोऽवलम्बिता विद्यते ।

## ६. चन्द्रवंशमहाकाव्यम्

पश्चिमनेपालस्य कैरिनाम्नि ग्रामे लब्धजन्मनो यज्ञशर्मसूरि स्याङ्जाजनपदस्य **आँधिखोला** इति ग्रामे संवर्धितः । पश्चात् रुरुक्षेत्रे काव्यरचनानुकूले कृष्णगण्डकीतटे निवसन् पितृतोषार्थं महाकाव्यमिदं रचितम् ।[३]

---

३. पूर्ववत्, पृ. ३ ।

त्रयोदशसर्गनिबद्धमिदं महाकाव्यमूनविंशशतकस्य मध्ये संरचितम् । राष्ट्रियाभिलेखालये संरक्षितं हस्तलिखितं महाकाव्यमिदं लिपिबद्धकर्तुरसावधानेनातीवाशुद्धं विद्यते ।[४] विक्रमस्य २०५८ तमे समये प्रा. डा. वेणीमाधवढकालवर्येण अशुद्धपरिष्कारसहितं सम्पादितं महाकाव्यमिदं नेपालराजकीय-प्रज्ञाप्रतिष्ठानसंस्थातः प्रकाशितम् । सपरिष्कारप्रकाशितं महाकाव्यमिदं न केवलं मूलमात्रमपितु नेपालीभाषायां सम्पादकस्य सुविस्तृतपरिचयात्मकालेखसहितं विद्यते । कविपरिचयः, महाकाव्यस्य स्वरूपम्, पृष्ठभूमिः, कथावस्तु, कोइरालावंशोपनामवृत्तान्तम्, रसभावध्वन्यलङ्कारादिकाव्यतत्त्वानुशीलनमित्यादयो विषया तत्रालेखे समाविष्टाः सन्ति । अधुना महाकाव्यमिदं प्रज्ञाप्रतिष्ठानस्य विक्रयकक्षे अन्ये पुस्तकविक्रयालये वा सारल्येन प्राप्तुं शक्यते ।

## ६.१ चन्द्रवंशवर्णनम्

प्रजापतेराज्ञया सृष्टौ संलग्नो मानसपुत्रोऽत्रिर्निर्जने वने तपः कुर्वन्नासीत् तदैव तस्य नेत्राच्चन्द्रः प्रादुर्भूतः ।[५] प्रजापतिश्चन्द्रमेव विप्रौषधिनक्षत्रजगतो राजानमकरोत् । राजत्वमवाप्य चन्द्रश्च राजसूययज्ञं कृतवान् । सौन्दर्यवीर्यबलादनेन बृहस्पतेः पत्नी तारा अपहृता । ब्रह्मणाज्ञया चन्द्रः बृहस्पतिपत्नीं तारां प्रत्यर्पितवान् । तदा तारा गर्भिणी आसीत् । पूर्णमासानन्तरं सा सुन्दरं पुत्रमजनयत् । तारावचनप्रमाणेन सः चन्द्रस्यैव पुत्र इति ब्रह्मा तं तारापुत्रं बुध इति नामकरणमकरोत् । सर्वसुन्दरो बुधो मनुमहाराजस्य पुत्री इलामुवाह । अनयोः पुत्रत्वेन पुरुरवा जनिं लेभे । पुरुरवानृपस्य स्वर्गसुन्दरी उर्वशी पत्नी जाता । अनयोरायुप्रभृतयः पञ्चपुत्राः सञ्जाताः । अनन्तरं पञ्चपुत्रेषु ज्येष्ठ आयुः राजाऽभुत् । आयुपश्चादस्य पुत्रो नहुषो राजाऽभवत् । पश्चात् नहुषस्य पुत्रो ययातिः, ययातेः पुत्रो जनमेजयः, जनमेजयस्य पुत्रः प्राचिन्वान् च चन्द्रवंशविस्तारे योगदानमकरोत् । अनन्तरं वंशेऽस्मिन् प्रवीरः, नमस्युः, चारूपदः, सुद्युः, बहुगवः, संयातिः, अहंयातिः, रौद्राश्वः, रितेयुः, रन्तिभारः, सुमतिः, रैभ्यप्रभृतय राजानः सञ्जाताः । रैभ्यस्य पुत्रो दुष्यन्तो दुष्यन्तस्य भरतश्च चन्द्रवंशस्य चक्रवर्ती नृपत्वेन ख्यातिं प्राप्तवान् ।[६] तदनु विततः, मन्युः, बृहत्क्षेत्रः, हस्ती, अजमीढः, नीलः, शान्तिः, सुशान्तिः, भर्म्यास्वप्रभृतयश्चन्द्रवंशीया राजानः शासनदण्डं प्राप्तवन्तः । भर्म्यास्वस्य मुद्गलः, यविनरः, बृहदिस्वः, कापिञ्जलः, जयश्चेति पञ्चपुत्राः सञ्जाताः । राज्यभाराधिकारी ज्येष्ठोऽपि मुद्गलः स्वभ्रातृवर्गान् राज्यभारं समर्प्य ब्रह्मत्वप्राप्त्यर्थं वनं गतः ।[७]

---

४. पूर्ववत्, पृ. ४ ।

५. पितुर्नियोगात् स चकार घोरमत्रिस्तपो निर्जनदेशमेत्य ।
तपस्यतस्तस्य दृगम्बुजाच्च पीयूषवर्षी प्रबभूव चन्द्रः ॥ १/११ ॥
यज्ञशर्मसूरिः, चन्द्रवंशमहाकाव्यम्, काठमाडौं : ने. रा. प्र. प्र., वि. सं. २०५८, पृ. ६९ ।

६. रैभ्योऽपि तनयं प्राप्य पितृदेवप्रसादजम् ।
दुष्यन्तं नाम राजर्षिरगमत् तपसे वनम् ॥ ३/३० ॥
कर्माणि श्रुतिविहितानि यानि कानि कण्वो जातकमुखानि तानि चक्रे ।
भर्तृत्वाद् भरत इतीह शंसिनाम्ना ख्यातोऽभूत् दिवि भूवि भारते च लोके ॥ ४/४ ॥ पृ.८४, ९० ।

७. अथो न राज्यं जगृहे स्वपैतृकं ज्येष्ठो गुणैर्वा वयसा च मुद्गलः ।

कठिनाराधनया हृष्टो नारायणो मुद्गलमिप्सितवरमददात् । अनन्तरं मुद्गलस्य ब्राह्मणकुलं मौद्गल्य इति नाम्ना ख्यातो जातः । अस्य मौद्गल्यब्राह्मणकुलस्य प्रथमो वंशजो दिवोदासोऽभवत् ।

### ६.१.१ महर्षिमुद्गलः

पौराणिकसाहित्येषु चन्द्रवंशीयानां राज्ञां कीर्तिचर्चा विश्रुता एव । तत्र च विलक्षणकार्यकारिणो मुद्गलस्य पृथक् वैशिष्ट्यान्वितं वर्णनं प्राप्यते ।[८] मुद्गलश्चन्द्रवंशे समुत्पन्नस्य राज्ञो भर्म्यास्वस्य पुत्रः, पञ्चभ्रातृषु ज्येष्ठ आसीत् । वंशानुगतनियमेन ज्येष्ठः पुत्र एव राज्यशासनस्य कृते योग्यो भवति । नियमानुसारं राज्याधिकारो मुद्गले समागतः । भ्रातृषु ज्येष्ठोऽपि मुद्गलः स्वभावेनैव शान्तः, विनम्रश्चासीत् । अतः स्वहस्ते समागतो राज्यभारो भ्रातृषु समर्प्य मुद्गलो निर्जने वने भगवतस्तपस्तप्तुं गतवान् । प्रियमेधप्रभृतयः स्वपूर्वजाः क्षत्रियराजानोऽपि तपसा ब्रह्मत्वमवाप्य ब्राह्मणा जाता इति घटनामनुश्रुत्य प्रेरितो मुद्गलः प्राणवायुं शिरसि संगृह्य कठोरं तपः कृतवान् ।[९] वारम्वारं स्वराज्यापहरणभयेन त्रस्ता देवा मुद्गलमपि तपसः प्रत्यावर्तनार्थं शृङ्गारनृत्यगीत-वैशिष्ट्यसम्पन्ना अप्सरसो नियुक्ताः ।[१०] परं मुद्गलस्य दृढनिश्चयस्याग्रे ते सर्वे तपोभङ्गप्रयासा निरर्थकाः जाताः । कतिचित् समयानन्तरं तपसा वशीभूतो नारायणो मुद्गलतपोभूमौ सशरीरं समागत्य ब्रह्मत्ववरप्रदानमकरोत् ।[११] भगवतो नारायणाद् ब्रह्मत्वं प्राप्य एष राजर्षिमुद्गलत्वेन परिवर्तितः । अनेनैव स्वशिखामग्नौ आहुत्य यज्ञशक्त्या चोलनरेशो विष्णुलोकः प्रापितः ।

#### ६.१.१.१ शिखाहवनवृत्तान्तः

महर्षिमुद्गलो ब्रह्मत्वं प्राप्य वैदिकधर्मसंवर्धयन् काञ्चीदेशमवसत् । तस्यैव काञ्चीदेशस्य राजा चोलनरेशः प्रतिदिनं काञ्चीपुरस्थे नारायणमन्दिरे स्वर्णकमलेन नारायणपूजां करोति स्म । तत्रैव विष्णुदासो नामकः कोऽपि ब्राह्मणः प्रतिदिनमेव तुलसीपत्रैः नारायणपूजां करोति स्म । प्रतिदिनं ब्राह्मणेनार्पितैः तुलसीपत्रै राजार्पितं स्वर्णपुष्पमाच्छादयति स्म । अनया दैनिकघटनया चोलनरेशः क्रोधयुक्तो जातः । स्वर्णपुष्पतुलसीपत्रमहिमाविषये नरेशविष्णुदासयोर्विवादः सञ्जातः । पश्चात्

---

किञ्चानुजेभ्यः प्रददौ निजासनम् जानन् स विश्वं मृतिजन्मभीतिदम् ॥१०/१ ॥ पूर्ववत्, पृ.१४२ ।

८. भर्म्याश्वस्तनयस्तस्य पञ्चासन्मुद्गलादयः ॥
मुद्गलाद् ब्रह्म निर्वृत्तं गोत्रं मौद्गल्यसंज्ञितम् ।
मिथुनं मुद्गलाद् भार्म्याद् दिवोदासः पुमानभूत् ॥
वेदव्यासः, श्रीमद्भागवतमहापुराणम्, ९/२१, गोरखपुर : गीताप्रेस, वि.सं. २०५४, पृ. ४०७ ।

९. किञ्च स्वबन्धून् प्रियमेधमुख्यान् स्वपूर्वजान् ब्राह्मणजातिभाजः ।
श्रुत्वा तथेच्छन् महितं द्विजत्वम् स्वस्याऽपि तत्तप्तुमनाः प्रतस्थे ॥ १०/२॥ पूर्ववत्, पृ. १४२ ।

१०. बह्वीः समास्तस्य तपस्यतः सुरा अवापुरार्तिं तपसोऽधिकं बलम् ।
ज्ञात्वा तदा मन्दविषण्णचेतसोऽ भवन् निजस्थानविनाशशङ्कया ॥ १०/१२।पूर्ववत्, पृ.१४४ ।

११. इति स्तुतो मुद्गलपार्थिवेन वचोऽब्रवीत् ताक्ष्र्यमधिष्ठितो हरिः ।
प्रितोऽस्मि ते वत्स ! वरं प्रतीच्छ भो यदीप्सितं ते प्रददाम्यहं नृप ! ॥१०।४५।पूर्ववत्, पृ.१५२।

हरिदासः तुलसीपत्रस्य महिमया अहं तुभ्यं पूर्वमेव हरिलोकं गमिष्यामीति पणं चकार ।[१२] अनन्तरं चोलनृपो यज्ञबलेन ब्राह्मणात् प्रागेव विष्णुलोकं गमिष्यामीति मनसीकृत्य यज्ञाचार्यान्वेषणक्रमे महर्षिमुद्गलाश्रमेऽगच्छत् । मुद्गलेनापि राज्ञोऽनुरोधः स्वीकृतः । राज्ञा मुद्गलस्याचार्यत्वे महायज्ञः समारब्धः ।[१३] विष्णुदासेनापि तीव्रतरेण तुलसीपत्रैर्नारायणस्याराधना कृता । कस्मिन्नपि दिने पूजायां निमग्नस्य ब्राह्मणस्य गृहे चौरः पक्वभोजनपात्रं नयति । परं ब्राह्मण रोषदुखादिपराङ्मुखः सन् नारायणपूजामेव करोति । पूजाप्रभावादेव स चौरो ब्राह्मणाग्रे समागत्य स्खलितः । विष्णुदासोऽपि क्रोधं विनैव चौरं जलसेचनेन उत्थाप्य स्वनिर्मितं भोजनं प्रददाति । एतादृशं ब्राह्मणभक्तिं विलोक्य नारायणाज्ञया विष्णुपार्षदैर्विष्णुदासो विमाने समारोप्य चोलनरेशस्याग्रत एव विष्णुलोके नीतः । अग्रत एवात्मनाऽपहेलितो ब्राह्मणो विष्णुलोकोऽगच्छदिति रुषा चोलनरेशः सशरीरं यज्ञकुण्डे प्रवेशार्थमुद्यतः ।[१४] अनया घटनया रुष्टो मुद्गलः गौखुरतुल्यां शिखां उत्पाट्य यज्ञाग्नौ हुतवान् ।[१५] शिखाहवनप्रभावात् सपदि एव यज्ञकुण्डाद् भगवन्नारायणः प्रादुर्भूतः । भगवता पृष्टे सति चोलनरेशो वैकुण्ठं प्रापय इति मुद्गल उवाच । भगवता मुद्गलप्रार्थना स्वीकृता । वैकुण्ठलोके सुशीलनाम्ना द्वारपालत्वेन चोलनरेशोऽलङ्कृतः ।[१६]

### ६.१.१.२ मौद्गल्यकुलपूजापद्धतिः

तपसा ब्रह्मत्वप्राप्त्या सुसन्तुष्टो मुद्गलः वैदिकसनातनधर्मप्रचारयन् काञ्चीदेशमवसत् । स्वप्रयासेन स्थापितो ब्राह्मणोपाधिभूषितो मौद्गल्यवंशः गृहस्थाश्रममनवलम्ब्य कथं प्रवृद्धिं गमिष्यतीति विचार्य मुद्गल एका सुशीला ब्राह्मणकन्यामन्विष्य उवाह । ततो दिवोदासो नामक एकः पुत्रः, अहल्या नामिका एका पुत्री च जाता । पुत्रीमहल्यां गौतमाय अददात् । अहल्यगौतमयोः पुत्रः शतानन्दो जातः ।[१७] शतानन्दस्य सत्यधृतिः पुत्रोऽभुत् । सत्यधृतेः शारद्वान् पुत्रो जातः । तस्योर्वशीदर्शनेन

---

१२. महिमानमस्य नृप ! वेत्ति जनः तुलसीदलस्य हरिदासवरः ।
तव पश्यतो हरिपदे स मम नयनं करिष्यति ममैष पणः ॥ ११/१० ॥पूर्ववत्, पृ. १५६ ।

१३. अथो मुनिर्मुद्गलनामधेयः शिष्यैः परितो नृपयागभूमिम् ।
उपेत्य यज्ञैः पुरुषं पुराणं ईजे हि चोलार्चितपादपद्मः ॥ ११/२३ ॥ पूर्ववत्, पृ. १५८ ।

१४. अहं न जीवामि विशामि बह्नौ गुरोऽत्र मे देह्यधुनैव चाज्ञाम् ।
यथा गमिष्यामि गुरो ! पदं तं शोच्येन देहेन ममास्ति किं शम् ॥११।३३ ॥पूर्ववत्, पृ.१६१ ।

१५. श्रुत्वैतन्नृपतिवचः सखेदम् विप्रेन्द्रः सपदि शिखां स्वकीयाम् ।
उत्पाट्य द्विजमनुसेविते कृशानौ स क्रोधादिव नृपतेश्च पश्यतोऽधात् ॥११/३४।पूर्ववत्, पृ.१६१ ।

१६. स मुद्गलोऽपीह वरं ययाचे पदं त्वदीयं नय चोलमेनम् ।
इत्यर्चितः सोऽपि पदं स्वकीयं नीत्वैव भृत्यप्रवरं चकार ॥ ११/३८ । पूर्ववत्, पृ. १६२ ।

१७. या स्त्री साऽहल्यकानाम्नी रूपेण श्रीरिवापरा ।
गौतमाय ददौ ताञ्च मुद्गलो मुनिचन्द्रमा ॥ १२/२ ॥
शतानन्दाभिधं तस्यां गौतमोऽजनयत् सुतम् ।
ब्रह्मवर्चस्विनं रम्यं सुरूपं सूर्यवर्चसम् ॥ १२/३ ॥

रेतस्खलनमभूत् । ततः कृपाख्यः पुत्रः, कृपीनामधेया पुत्री च बभूव । कृपः पाण्डवानां कुलगुरुः, कृपी च द्रोणपत्न्यभवत् ।[१८] पुत्रस्य दिवोदासस्योपनयनसंस्कारं सम्पाद्य तं कुलपूजायाः पद्धतिं प्रशिक्षितवान् ।[१९]

मौद्गल्यवंशजैः प्रतिवर्षे कुलदेवस्य पूजा करणीया । अस्माकं कुलदेवः शङ्करोऽस्ति । कुलदेवे सन्तुष्टे सति धर्मार्थकाममोक्षादयश्चतुर्वर्गाः फलन्ति ।[२०] सा पूजा वैशाखमासस्य पौर्णमास्याः पूर्वदिवस एव क्षौरं विधाय स्वसामर्थ्यानुकूला करणीया । तदा धौतवस्त्रं धारणीयम् । प्रक्षालितपात्रं प्रयोक्तव्यम् । दिवासमये निराहारः सन् रात्रावेव फलाहारः करणीयः । वेदविद्याविरदान् विप्रान् निमन्त्रयेत् । तेषां सङ्ख्या एकः पञ्च, दशो वा भवितुं शक्नोति । स्वकुलाग्रजस्य वेश्मनि, सर्वै वंशजैर्निश्चिते भूतले वा पूजास्थलं कुर्यात् । स्वकुलधर्मप्रवर्तकान् ब्राह्मणानाहूय वृणुयुः । तेऽपि द्विजश्रेष्ठाः रुद्राभिषेकम्, शान्तिपाठम्, चण्डीपाठम्, वेदपाठञ्च कुर्वन्तु । अग्निस्थापनपूर्वकं पायसेन जुहुयात् । वैदिकैस्तान्त्रिकैर्मन्त्रै हविषा युतैश्चरुभिश्च हवनं कुर्यात् ।[२१] कुलपूजायै कर्ताजनोऽपि विभूतिधारणं कुर्यात् । विभूतिधारणे विनियोगश्च विद्यते यत्- अस्य विभूतिमन्त्रस्य सदाशिवऋषिः उष्णिक् छन्दः शिवो देवता, ध्रुवो बीजं शिवत्वप्राप्तये जपे विनियोगः इति ।[२२]

अनन्तरं मन्त्रमुच्चारयेत्-

---

१८. तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः ।
शरद्वान् तत्सुतो यस्य ह्युर्वशीदर्शनात् किल ॥
शरत्स्तम्बेऽपतद्रेतो मिथुनं चाभवच्छुभम् ।
कृपः कुमारः कन्या च द्रोणपत्न्यभवत् कृपी ॥ १०/५,६ ॥ पूर्ववत्, पृ. १६४ ।

१९. सोपवीतं सुतं ह्येनं शौचाचारानशिक्षयत् ।
ततः स्वकुलदेवस्य पूजाविधिमुवाच ह ॥ १२/७ ॥ पूर्ववत्, पृ. १६५ ।

२०. प्रतिवर्षं प्रकुर्वीत कुलदेवस्य पूजनम् ।
कुलदेवो महेशो नः पूजितः पितृपूर्वजैः ॥
कुलदेवे सुसन्तुष्टे चतुर्वर्गाः फलन्ति हि ।
तस्मादवश्यं कर्तव्यं कुलदेवार्चनं सुतैः ॥ १२/८,९ ॥ पूर्ववत्, पृ. १६५ ।

२१. वैशाख्यां पौर्णमास्याञ्च यथावित्तं यथाश्रुतम् । तत्पूर्वदिवसे क्षौरं कुर्वीत नियमे स्थितः ॥
वाससां क्षालनं कुर्यात् पात्राणाञ्च प्रशोधनम् । नक्ताशी चैकभक्तो वा भवेत्तद्भूतवासरे ॥
निमन्त्रयेच्च विप्रान् स्वान् वेदविद्याविशारदान् । दश पञ्चाथवैकं वा शुद्धचित्तः प्रसन्नधीः ॥
पूजोपकरणं सर्वं विदध्यादामिषं विना । संहत्य कुलजाः सर्वे स्वकुलाग्रजवेश्मनि ॥
सर्वेषामथवा बुद्धिर्यत्रास्ति तत्र भूतले । पौर्णमास्यां प्रगे तत्राऽभिषेकाय शिवोपरि ॥
ब्राह्मणान् वृणुयुः स्वीयान् कुलधर्मप्रवर्तकान् । तेऽपि कुर्युद्विजश्रेष्ठा रुद्राध्यायेन रुद्रियम् ॥
शान्तिपाठादिकं चण्डीपाठं वेदञ्च पाठयेत् । जुहुयात् पायसेनैव ह्यग्निस्थापनपूर्वकम् ॥
वैदिकैस्तान्त्रिकैर्मन्त्रैश्चरुभिर्हविषा युतैः ।
देवपूजाप्रकाराञ्च समासात् शृणु तत्त्वतः ॥ पूर्ववत्, पृ. १६५-६६ ।

२२. विभूतिधारणं कार्यं पूजाऽऽदौ धीमता तदा । अस्य विभूतिमन्त्रस्य सदाशिव ऋषि स्मृतः ॥
उष्णिक् छन्दो देवाता तु शिवो बीजं ध्रुवः स्मृतम् ।
शिवत्वप्राप्तये चोक्तो विनियोगो जपे सदा ॥ १२/१९,२० ॥ पूर्ववत्, पृ. १६६ ।

सदाशिव ! महेशान ! सर्वभूतिविधायक !।
विभूतिसिद्धिर्भवतु त्वत्प्रसादात् सुरेश्वर !॥[२३]

अनन्तरं सद्योजातादिकैः पञ्चभिर्वैदिकमन्त्रैर्भष्मं मन्त्रयेत् । अग्निरित्यादिभिर्मन्त्रैर्भष्मना सह तायं संयोजनीयम् । तं भष्मं साम्बं ध्यायन् मध्यमानामिकाऽङ्गुष्ठैरनुलोमविलोमत आपादमष्तकं लिम्पेत् । भष्मत्रिपुण्ड्रेण रुद्राक्षमालया च विना पूजितो महेशः फलप्रदो न स्यात् ।[२४] अनन्तरमेव कोऽपि वंशजस्तन्त्रोक्तविधिना पूजां प्रारभेत । तदा तन्त्रोक्तं न्यासजालं कृत्वा शङ्करं ध्यायेत्, यथाशक्ति निजं शैवमन्त्रमपि जपेत् । स्वमन्त्रेण तन्त्रवेदिभिरुक्तैर्मन्त्रैश्चावाह्य शिवयन्त्रमध्ये उत्तमं पार्थिवं लिङ्गं स्थापनीयम् । वैदिकैस्तान्त्रिकैर्मन्त्रै विशेषतस्तत्कालसम्भवैः पुष्पैर्विल्वपत्रैश्च पूजयेत् । वंशजो भक्तितत्परः सन् पाद्यार्घ्याचमनीयाद्यैर्यथालब्धोपचारकैः गन्धपुष्पादिभिश्च पूजयेत् ।[२५] तत्र पूजायां कंसारापूपस्वाहालिशष्कुलीप्रभृतीनि नैवेद्यानि चार्पयेत् । पूजां समाप्य सर्पिषा पायसेन च सहस्रमष्टाधिकं शतं वा हुनेत् । ततः प्रदक्षिणां कृत्वा कुलदेवं विसृज्य कुलजा जना एकत्रीभूय अभिषेकं गृहणीयु । घृतपक्वादिभिः पायसादिभिरन्नैश्च प्राक् ब्राह्मणान् भोजयेत् पश्चात् ज्ञातयोऽपि स्वयं भुञ्जीरन् ।[२६] तत्र मांसस्य भोजनं वर्ज्यं भवति । अनेन विधिना ये कुलपतिं प्रसन्नं कुरुते तेषां कुलानि पशुभृत्यादिभिस्सह वर्धन्ते, इहलोके शुभान् भोगान् भुक्त्वा परलोकेऽपि उत्तमां गतिं प्राप्नुवन्ति । तैः कुलदेवप्रसादात् कैलासाख्यं परं धाम यद्वा योगीन्द्र-वाञ्छितं स्थानं प्राप्नुवन्ति । तस्मादेव बुद्धिमद्भिः कण्ठगतैः प्राणैरपि श्रीकुलदेवस्य पूजा न हातव्या इति ।[२७]

---

२३. पूर्ववत्, पृ. १६६ ।

२४. सद्योजातादिकैर्मन्त्रैर्मन्त्रयेद् भष्म पञ्चभिः । संयोज्य भष्मना तोयमग्निरित्यादिभिः पुनः ॥
विशिष्य साम्बं ध्यायन् तं लिम्पेदापादमस्तकम् । मध्यमानामिकाऽङ्गुष्ठैरनुलोमविलोमतः ॥
विना भष्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥ १२/२२-२४ ॥ पूर्ववत्, पृ. १६७ ।

२५. तन्त्रोक्तं न्यासजालं वा कृत्वा ध्यायेत शङ्करम् । ततो निजं शैवमन्त्रं यथाशक्ति जपेद् बुधः ॥
स्वमन्त्रेणापि चावाह्य यदुक्तं तन्त्रवेदिभिः । यन्त्रे संस्थाप्य मध्ये वै पार्थिवं लिङ्गमुक्तमम् ॥
वैदिकैस्तान्त्रिकैर्मन्त्रैः पूजयेद् भक्तिपूर्वकम् । तत्कालसम्भवैः पुष्पैर्विल्वपत्रैर्विशेषतः ॥
पाद्यार्घ्याचमनीयाद्यैर्यथालब्धोपचारकैः ।
गन्धपुष्पादिभिश्चैव पूजयेद् भक्तितत्परः ॥ १२/२६-२९ ॥ पूर्ववत्, पृ. १६७ ।

२६. कंसारापूपस्वाहालिशष्कुलिप्रभृतीनि च । नैवेद्यान्यर्पयेत्तत्र पूजायाञ्च विशेषतः ॥
समाप्य पूजां तत्रैव हुनेदपि च सर्पिषा । पायसेन सहस्रं वा शतमष्टाधिकं तु वा ॥
विसृज्य कुलदेवं तं कृत्वा प्रदक्षिणा ततः । कुलानि तानि संहत्य गृहणीयुरभिषेककम् ॥
पायशादिभिरन्नैश्च घृतपक्वादिभिस्तथा ।
ब्राह्मणान् भोजयेच्चापि भुञ्जीरन् ज्ञातयः स्वयम् ॥ १२/३०-३३ ॥ पूर्ववत्, पृ. १६८ ।

२७. मांसस्य भोजनं वर्ज्यं तत्र सर्वात्मना सुतैः । अनेन विधिना ये तु प्रसन्नं कुर्वते पतिम् ॥
तेषां कुलानि वर्धन्ते पशुभृत्यादिभिः सह । इह भोगान् शुभान् भुक्त्वाऽमुत्र चानुत्तमां गतिम् ॥
कैलाशाख्यं परं धाम यद्वा योगीन्द्रवाञ्छितम् । कुलदेवप्रसादाच्च प्राप्नुवन्ति कुलोद्भवाः ॥

### ६.१.१.३ नेपालदेशे मौद्गल्यवंशजाः

चन्द्रवशजो मुद्गलः काठिन्येन तपसा प्रभावेण ब्राह्मणत्वं प्राप्तमिति पुराणप्रसिद्धो वृत्तान्तः । इदमेव तथ्यं बीजत्वेनाङ्गीकृत्य रचितं महाकाव्यमिदं गरिमापूर्णम् । अत्र चन्द्रवंशीनृपाणां सुविस्तारेण वर्णनं प्राप्यते, तथापि मुद्गलवृत्तान्त एवास्य महत्त्वं ख्यापयति । स्वतपःप्रभावात् ब्राह्मणत्वं प्राप्य मुद्गलो मौद्गल्यवंशवर्धनार्थं गृहस्थाश्रमं प्राविशत् । काचित् सुशीलां ब्राह्मणकन्यां विवाह्य काञ्चीदेशे वसति स्म । तयोर्दिवोदासाख्यः पुत्रः, अहल्याख्या पुत्री चाभवत् । तत्रैव दिवोदासस्य पुत्रपौत्रादयो मौद्गल्यवंशजाः सञ्जाताः । ते चिरकालपर्यन्तं कुलधर्मनिरताः सन्तः काञ्चीदेश एव न्यवसत् । तत्र कालान्तरे तुर्कदेशीयैर्म्लेच्छैः समाक्रम्य वैदिकसनातनधर्मनिष्ठाः जनाः परिपीडिताः । अनया घटनया दुःखिता मौद्गल्यवंशजाः स्वकीयवैदिकसनातनधर्मरक्षार्थं हिमवत्खण्डस्य तले स्थितं पवित्रतमं नेपालदेशं प्रविष्टवन्तः । अत्र समागत्य पश्चिमनेपालस्य **कैरि** इत्याख्ये ग्रामे निवासस्थानमन्विष्य न्यवसन् । वासस्थानस्य नाम्ना तेषां वंशोपनाम कैराला जाता ।[२८] इदमेव नाम पश्चात् **कोइराला** इत्युपनाम्ना ख्यातो जातः । एवमेव **तिम्सिना**, **कुइँकेलः**, **वेल्काणी**प्रभृतयोऽपि स्थाननामभेदेन पृथग् वंशोपनाम्ना प्रसिद्धा जाताः ।

## ३. निष्कर्षः

यज्ञशर्मसूरि नैपालकसंस्कृतकविषु प्राचीनोऽस्ति । अयं भगवतश्चन्द्रमसः प्रवर्तितं गुणगणगरिष्ठं चन्द्रवंशमाधृत्य चन्द्रवंशमहाकाव्यं प्रणीतवान् । अत्र कविना चन्द्रवंशस्य विशिष्टगुणसम्पन्नाः सर्वे वंशजा वर्णनविषयीकृता, तथापि महर्षिमुद्गलेनोप्तं मौद्गल्यवंशबीजमेव प्रकाशनमस्य कवेर्मूलमुद्देश्यं विद्यते । महर्षिमुद्गलस्य वृत्तान्तः पुराणप्रसिद्धोऽस्ति । श्रीमद्भागवतमहाभारतप्रभृतिषु ग्रन्थेषु चन्द्रवंशवर्णनक्रमे मुद्गलस्यापि वृत्तान्तः प्राप्यते । पौराणिकेतिहासे विश्वामित्रप्रभृतयो बहवः क्षत्रियास्तपसा ब्राह्मणवंशप्रवर्तका अभवन् । एवमेव महर्षिमुद्गलोऽपि तपसः प्रभावात् मौद्गल्याख्यो ब्राह्मणवंशप्रवर्तको जातः । अस्य वैदिकशक्तिरपि असामान्यासीत् । येन शरीरान्वितश्चोलनरेशः वैकुण्ठः प्रापितः । अयं किञ्चित् हठभावान्वितोऽपि आसीत् । अतश्चोलनरेशयज्ञेऽयं शीघ्रमेव विष्णुप्रित्यर्थं स्वकीयां शिखामपि जुहोति । एतादृशः शौर्यशक्तिशीलो मुद्गलो मौद्गल्यवंशस्य प्रवर्तकोऽस्ति । अत एवास्य केचिद् वंशजा देशेऽस्मिन् तदीयवंशाणुगत-गुणांशसमाविष्टाः सन्तो राजनैतिकसामाजिकसाहित्यिकप्रभृतिषु क्षेत्रेष्वनुकरणीयं कार्यं कृत्वा स्वर्गीया अपि यशः शरीरशोभिताः सन्ति ।

---

तस्माच्छ्रीकुलदेवस्य प्राणैः कण्ठगतैरपि ।
बुद्धिमद्भिर्न हातव्या परा पूजा महेशितुः ॥ १२/३४-३७ ॥ पूर्ववत्, पृ. १६८ ।

२८ आगत्य तत्रापि च कैरिनाम्नि ग्रामे पशव्ये सुजने सुपेये ।
रम्ये निवासं कृतवन्त एते तस्थुर्गृहस्थाश्रमधर्मयुक्ताः ॥
तद्ग्रामवासादुपनामयेयाः कैराल इत्येव हि ते प्रसिद्धाः ।
तत्रत्यवश्याश्च तदेव नामवन्तो बभूवुश्च वयं ह्यभूम ॥ १३/१६,१७ ॥ पूर्ववत्, पृ. १७३ ।

## सन्दर्भग्रन्थसूची


कोइराला, श्रीप्रसादः, (२०७६), महर्षि मुद्‌गल एवम् कोइराला वंशको सङ्क्षिप्त पृष्ठभूमि, *मुद्‌गल सन्देश* (वर्ष १२, अङ्क ६) कोइराला सेवा समाज नेपालः ।

कोइराला, लक्ष्मीकुमारः (२७६), चन्द्रसम्भवमहाकाव्यको सङ्क्षिप्त परिचय, मुद्‌गल सन्देश, (वर्ष १२, अङ्क ६) कोइराला सेवा समाज नेपालः ।

ढकालः, वेणीमाधवः (२०५५), *हरिकेलिमहाकाव्यम्* (भूमिका), दाङ : नेपालसंस्कृतविश्वविद्यालयः ।

तिमिल्सिना, महानन्दः (२०६९), नैपालकसंस्कृतमहाकाव्यलेखनपरम्परा, *प्रज्ञाज्योतिः*, (वर्ष : १, अङ्क : १) ने.प्रा.संघः ।

पोखरेल, नुरापतिः (२०६७), नेपालमा संस्कृत महाकाव्य परम्परा, *प्रभा* (वर्ष : २० अङ्क : १०) पिण्डेश्वरविद्यापीठम्, धरानः ।

भट्टराई, माधवः २०४३), *नैपालककविविरचितानां संस्कृतमहाकाव्यानां समालोचनात्मकमध्ययनम्*, (अप्रकाशितः शोधप्रबन्धः) त्रिभुवनविश्वविद्यालयः ।

वेदव्यासः, २०५४), *श्रीमद्‌भागवतमहापुराणम्*, गोरखपुर : गीताप्रेस ।

शर्मा, रामहरिः (२०६१), नेपालदेशीयसंस्कृतमहाकाव्येषु कार्तवीर्योदयमहाकाव्यस्य स्थानम्, *ऋतम्भरा*, (वर्ष : ७, अङ्क : १०) ने.सं.वि.अनुसन्धानकेन्द्रम् ।

सूरिः, यज्ञशर्मा (२०५८), *चन्द्रसम्भवमहाकाव्यम्*, काठमाडौं : ने. रा. प्र. प्र. ।

ज्ञवाली, रीता (२०७१), *चन्द्रवंशमहाकाव्यस्य साहित्यिकमनुशीलनम्* (अप्रकाशित शोधप्रबन्धः) ने. सं.वि., अनुसन्धानकेन्द्रम् ।